CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रीरामायनमः ॐनमोभगवते वासुदेवाय अथपुरुषोहवैनारायणोऽकामयतप्रजाः
सृजेतिनारायणात्प्राणोजायतेमनःसर्वेंद्रियाणिचखंवायुर्ज्योतिरापश्चपृथ्वीवि
श्वस्यधारिणीनारायणाद्ब्रह्माजायतेनारायणाद्रुद्रोजायतेनारायणात्प्रजाप
तिर्जायतेनारायणादिन्द्रोजायतेनारायणादष्टौवसवःनारायणाद्द्वादशादि
त्याःसर्वादेवताःसर्वेऋषयःसर्वाणिछन्दांसिसर्वाणिचभूतानिनारायणादे
वसमुत्पद्यंतेनारायणेप्रलीयंतेअथनित्योदेवएकोनारायणोब्रह्माचनारा
यणाःशिवश्चनारायणोऽग्निश्चनारायणःकालश्चनारायणोमूर्त्तामूर्त्तेश्च
नारायणोन्तस्द्यौश्चनारायणोबहिश्चनारायणोनारायणएवेदंसर्वंयभू
तंयच्चभाव्यम् अथनित्योनिःकलोनिरवयवोनिर्विकल्पोनिरञ्जनःशुद्धोदेवए

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कोनारायणोनद्वितीयोस्तिकश्चिन्नयएवंवेदसविस्मरेवभवति।२ रुद्रंसमारधिंस्मत्वाम
नःप्रयहवान्सुमानमयानिपरमंपारंविश्वात्वंपद्मव्ययमिति ३ एतद्वैनारायणास्यो
पनिषदंयोहवैनारायणस्योपनिषदमधीतेससर्वेभ्यःपापेभ्योऽघोरेभ्योविमुक्तोभव
तिससर्वान्कामान्नाप्नोतिससर्वांश्चलोकान्नाप्नोतिब्रह्मत्वंचगत्वामृतत्वंचगच्छत्यम
तत्वंचगच्छतीति ४ ओमित्येतदग्रेव्याहरन्नमऋतिपश्चान्नारायणायेतुपरिष्टादो
मित्येकाक्षरंनमऋति द्वेअक्षरेनारायणायेतिपञ्चाक्षराणि एतद्वैनारायणास्याष्टा
क्षरंपदंयोहवैनारायणास्याष्टाक्षरंपदमधीत्यनुपद्रवःसर्वमायुरेतिविन्दतेप्राजाप
त्यंरायस्पोष्यंगोपत्यंततोमृतत्वमश्नुतेमृतमश्नुतऋति मत्यगानन्दब्रह्मपुरुषंप्रणव
स्वरूपंअकारउकारमकारऋतितानेकधासमभवत्तदेतदोमितियोमुक्तोमुच्यतेयोगी

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

संसारबन्धनात् ओंनमोनारायणायेतिमंत्रोपशकोवैकुण्ठभवनंगमिष्यतितद्विष्णोः परंपुराडरी
काक्षंविज्ञानघनंतडित्सामासमात्रंडोंब्रह्मणोदेवकीपुत्रोब्रह्मणोमधुसूदनःब्रह्मणः पुरा
काक्षोब्रह्मण्यो विष्णुरुच्यतइतिसर्वभूतस्थमेकंनारायणाकारणास्वरूपमकारंपरंब्रह्मओमे
तदथर्वशिरोयोधीतेसपापोःपापोभवतिमातरंधीयानोरात्रिकृतंपापंनाशयतिसायमधी
यानोदिवसकृतंपापंनाशयतिसायंप्रातरधीयानेःपापोःपापोभवतिमध्यंदिनमादि
त्याभिमुखोःधीयानःपञ्चमहापातकोपपातकात्प्रमुच्यतेसर्ववेदपारायणंलभतेना
रायणोसायुज्यमाप्नोति·श्रीमन्नारायणोसायुज्यमाप्नोतियएवंवेद·इत्यथर्ववेदेनारा
यणोपनिषत्समाप्तः॥शुभमस्तु·॥

२

Kashi Maharani Collection, Ramnagar Fort, Varanasi